Mysore Oriental Series No. 1

श्रीमदप्पयशिवाचार्यविरचितभाष्योपेता

अद्वयतारकोपनिषत्

ADVAYATĀRAKOPANIṢAT

With the Commentary of

Śrī Appayaśivācārya

Critically Edited with Introduction

BY

VIDVAN N. S. VENKATANATHACHARYA

Senior Research Assistant, Oriental Research Institute, Mysore

THE ORIENTAL RESEARCH INSTITUTE

UNIVERSITY OF MYSORE

MYSORE

1969] [35 Paise

THE MYSORE ORIENTAL SERIES

EDITED
WITH THE KIND CO-OPERATION OF VARIOUS SCHOLARS

BY

Dr. G. MARULASIDDAIAH, M.A., Ph.D.
Professor and Head of the Department of P.G. Studies and Research in Sanskrit, University of Mysore and Director, Oriental Research Institute Mysore

ORIENTAL RESEARCH INSTITUTE, MYSORE

प्राच्यविद्यासंशोधनालय-प्रकाशनम्—११३

महिषूरपुरीय प्राच्यविद्या लघुग्रन्थमाला-१

THE MYSORE ORIENTAL SUPPLEMENT SERIES-1

THE MYSORE ORIENTAL RESEARCH INSTITUTE PUBLICATION NO. 113

1969

THE MYSORE ORIENTAL SUPPLEMENT SERIES

EDITED
WITH THE KIND CO-OPERATION OF VARIOUS SCHOLARS

BY

DR. G. MARULASIDDAIAH, M.A., Ph.D.

Director
Oriental Research Institute
University of Mysore
Mysore

PUBLISHED BY

The Director
Oriental Research Institute
University of Mysore
Mysore

श्रीमदप्पयशिवाचार्यविरचितभाष्योपेता

अद्वयतारकोपनिषत्

ADVAYATĀRAKOPANISAT

With the Commentary of

Śrī Appayaśivācārya

Critically Edited with Introduction

BY

VIDVAN N. S. VENKATANATHACHARYA
Senior Research Assistant, Oriental Research Institute, Mysore

THE ORIENTAL RESEARCH INSTITUTE
UNIVERSITY OF MYSORE
MYSORE
1969

प्रथमं संस्करणम् — १९६९
First Edition — 1969

Published at the Oriental Research Institute, University of Mysore, by the Director and Printed by the Deputy Director, University Printing Press, Manasagangotri, Mysore-6

FOREWORD

THE *Advayatārakopaniṣatbhāṣya* is one of the numerous philosophical works of Śri Appayaśivācārya, who flourished about the beginning of the 18th century A.D. The salient points worth noting in his works are several. The Sāṅkhya-yoga system of philosophy, which is the starting point for the vast growth of Indian philosophical works from earlier times, has also been the basis for the works of Śri Appayaśivācārya. There are many commendable qualities found in his works, some of them may be substantiated as follows :

He does not approve of the dialectic method of interpretation found too much in the later philosophical works. Whenever he is interpreting a topic, he tries to see how far the particular text has a bearing upon the topic and also he does not crave for twisting facts themselves. He claims intuitive experience alone as the best means of knowledge as understood by स्वदेहान्तर्वर्ति ज्योतिर्दर्शनं विना .... मोक्षासंभवः in the present work and also परोक्षाद्वैतिनां found in his *Gītābhāṣya*, and therefore does not recognise meaningless symbols. Hence he follows Śaṅkarācārya and independently postulates '*anubhavādvaita*'.

It is hoped that the seekers of 'Truth' who were so far disgusted by the logical disputations may find solace in the works of Śrī Appaya-śivācārya.

G. MARULASIDDAIAH
Director
Oriental Research Institute

Mysore–5
22nd March 1969

द्वित्रा वाच :

विदितमेवेदं समेषां यत्—प्रकृतिपुरुषयोः स्वरूपं, जगत्सृष्टिस्थितिलयानां परमगम्भीरां गतिं, मोक्षोपायभूतसाङ्ख्ययोगमार्गं बन्धमोक्षरहस्यं च समुपदिशन्त्यः उपनिषद एव आर्षवाङ्मयेषु अग्रिमं पदमधितिष्ठन्तीति। तादृशनैकविधयोगमार्गविवरणरूपासु तासु बह्वयः अद्यत्वेऽपि दशोपनिषद इव न प्रचारपथपथिकाः अभवन्नित्येतत् महत्प्रमादस्थानमेव। अत्र च न केवलं प्राचीनव्याख्यातॄणां उपेक्षैव कारणं, अपि तु मुमुक्षूणां विषयानुगुणप्रवृत्त्यनधिगमोऽपि—इत्युक्तिः न विरुद्ध्येत।

प्रकृते तु एवंविधसम्प्रतिपन्नभाष्यकारानुगमनं विहाय, विषयगतिमेवानुसृत्य सर्वासामप्युपनिषदां विशदतया भाष्यं रचितवत्सु केषुचित् श्रीमन्तः अप्पयशिवाचार्याः सुप्रतिष्ठिताः राराज्यन्ते—इत्येतच्च महता प्रमोदेनावेदयामः।

प्रायशो वेदान्तग्रन्थाः तत्तन्मतसिद्धान्तानेव अवलम्ब्य वादप्रस्थानशरणाः स्वां स्वां तनुं समेधयामासुः, न तु अध्यात्मशास्त्रमूलभूतौ साङ्ख्ययोगावाधारीकृत्यानुभवमार्गानुकूलं स्वरूपमाविरकार्षुः इति कथनं न विसंवदेत। अमी अप्पयशिवाचार्याः परं, प्रतिग्रन्थं साङ्ख्ययोगमूलकतां तत्समन्वयसरणिं च नैवोज्झांचक्रुः। अमी च स्वमतं अनुभवाद्वैतमित्याह्वयन्ति। तत्र तत्र वागद्वैतं परोक्षाद्वैतं च परिहसन्तः अपरोक्षाद्वैतमेवानुसर्तव्यमिति मुक्तकण्ठं घोषयन्ति। एतेषां शैववैष्णवब्रह्मवादसामरस्यसाधनमपि महद्रामणीयकमेव आधत्ते।

अद्यत्वे च प्रचारपथे सतः शाङ्कराद्वैतस्य अस्य च कतिपयेष्वंशेषु मतभेददर्शनेऽपि, भगवत्पादशङ्करहृदयस्य अस्य च कियदान्तर्यं? इत्यमुमंशं तु सम्यगपरिशील्य 'अयं शङ्कराद्वैताद भिन्नः पन्थाः' इति निर्णीतिः अतीव साहसमित्येव वयं मन्यामहे।

> "भिद्यते हृदयग्रन्थिः छिद्यन्ते सर्वसंशयाः।
> क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे॥"
>
> "इह चेदवेदीत् अथ सत्यमस्ति।"
>
> "ज्ञानं लब्ध्वा परां शान्तिं अचिरेणाधिगच्छति।"

इत्यादि श्रुतिस्मृत्यनुरोधेन विनात्मदर्शनं नैव मुक्तिः कल्पशतैरपि इत्ययमंशः अमीषां प्रतिग्रन्थं प्रतिरेखं च ओतप्रोतं प्रतितिष्ठति। भगवत्पादा अपि—

> 'ज्ञानविहीनः सर्वमतेन मुक्तिं न भजति जन्मशतेन'

इत्येवोदघोषयन्। साम्प्रतं प्रकटयिष्यमाणे अस्मिन् अद्वयतारकोपनिषद्भाष्येऽपि

> 'स्वदेहान्तर्वर्तिज्योतिर्दर्शनं विना तत्त्वमसीत्युपदिशतां, अहं ब्रह्मास्मीति वाङ्मात्रेण प्रलपतां च भ्रान्ततमानां कल्पकोटिष्वपि संसारबन्धान्मोक्षासम्भवात् मोक्षप्रथमसाधनत्वाच्चास्य दर्शनस्य उपेक्षा न कदापि कार्या।'

इति स्पष्टमेव व्याख्यन्।

अमी च ग्रन्थकृतः विश्वविख्यातचतुश्शतग्रन्थनिर्मातॄणां श्रीमदप्पय्यदीक्षितानामन्ववाये प्रादुर्भूताः श्रीसुन्दरेश्वरताताचार्यशिष्याः ताम्रपर्णीतीरवासिनः इति स्वलेखैरेव प्रख्यापयन्ति। एते च अष्टादशशततमे क्रिस्ताब्दे स्वजनुषा इमां धरामलङ्कृतवन्तः स्युः। एतानधिकृत्य समनन्तरे प्रकाशने विशदं विचारयामः। एतैः रचिताः ग्रन्थाः यावदद्य न मुद्रिताः इत्येव प्रतीयते।

अस्मत्संस्थायाः परमिदं वैशिष्ट्यं—यत् अमीषां प्रायशः पञ्चाशदुत्तरैकशतं ग्रन्थानां मातृकाः सम्पाद्य प्रतिलिप्यादिकरणेन संरक्षिताः इति। प्रकृते च उदाहरणाय अदसीयं 'अद्वयतारकोपनिषद्भाष्यं' प्रथमतः अत्र प्रकाश्यते। इदं चास्तिकजनादृतं सत् आध्यात्मिकीं स्फूर्तिं विकास्य सहकुर्यादित्याशास्महे।

इति सहृदयवशंवदः
एन्. एस्. वेङ्कटनाथाचार्यः
प्राच्यविद्यासंशोधनालयः, मैसूरु

॥ श्रीः॥

श्रीमदप्पयशिवाचार्यविरचितभाष्योपेता

अद्वयतारकोपनिषत्

ॐ—पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥
ॐ शान्तिः शान्तिः शान्तिः ।

[व्याख्येयो विषयः, तदधिकारी च]

अथातोऽद्वयतारकोपनिषदं व्याख्यास्यामः । यतये जितेन्द्रियाय शमादिषड्गुणपूर्णाय ।

[योगानुष्ठानं तत्फलं च]

चित्स्वरूपोऽहमिति सदा भावयन् सम्यङ्निमीलिताक्षः किञ्चिदुन्मीलिताक्षो वा अन्तर्दृष्ट्या भ्रूदहरादुपरि सच्चिदानन्दतेजःकूटरूपं ब्रह्म अवलोकयन् तद्रूपो भवति ।

[अद्वयतारकपदार्थौ]

गर्भजन्मजरामरणभयात् संतारयति तस्मात्तारकमिति । जीवेश्वरौ मायिकाविति विज्ञाय सर्वविशेषं नेति नेति विहाय यदवशिष्यते तत् अद्वयं ब्रह्म ।

[तदधिगमोपायः]

तत्सिद्ध्यै लक्ष्यानुसन्धानं कर्तव्यम् ।

[परिच्छिन्नज्योतीरूपलक्ष्यानुसन्धानस्यापि चित्तशुद्धिफलकत्वम्]

(भाष्यम्) मूर्तामूर्तात्मकं यत्र तारकद्वयमुच्यते ।
ज्योतिर्दर्शनमार्गोक्तिं व्यख्यास्येऽद्वयतारकम् ॥

ननु—"जीवेश्वरौ मायिकाविति विज्ञाय सर्वविशेषं नेति नेति विहाय यदवशिष्यते तदद्वयं ब्रह्म"ति यदुक्तं तद युक्तमेव । अपि तु—ततसिद्ध्यै "लक्ष्यत्रयानुसन्धानं कर्तव्यम्" इत्येतदयुक्तम् । कुतः? लक्ष्यत्रयस्य च देहान्तर्गतत्वेन परिच्छिन्नज्योतिःस्वरूपतया स्वयमपरिच्छिन्नत्वाभावात् । अद्वयब्रह्म हि अपरिच्छिन्नं महाकाशवत् प्रसिद्धम् । तत्सिद्ध्यै

परिच्छिन्नलक्ष्यत्रयानुसन्धानं कथं साधनं स्यात्? अपरिच्छिन्नब्रह्मसिद्ध्यै हि अपरिच्छिन्नब्रह्मध्यानं कर्तव्यम्। अतः इह विरुद्धमुक्तमिति चेत्—सत्यमेवैतत्। तथापि उक्तलक्ष्यत्रयानुसन्धानद्वारा संशुद्धचित्तस्यैव वाक्यार्थश्रवणमननसंस्कृतान्तःकरणवशीकरणपूर्वकापरिच्छिन्नब्रह्मात्मैक्यानुसन्धानकरणसामर्थ्यसम्भवात्। अन्यथा देहमध्यगतज्योतिर्दर्शनहीनस्य वाक्यादिश्रवणादिप्रवृत्त्यसम्भवाच्च परिच्छिन्नानुसन्धानं युक्तमित्यनुसन्धेयम्।

[तत्राद्यस्य अन्तर्लक्ष्यस्य स्वरूपं तदभ्यासफलानि च]

देहमध्ये ब्रह्मनाडी सुषुम्ना सूर्यरूपिणी पूर्णचन्द्राभा वर्तते। सा तु मूलादारभ्य ब्रह्मरन्ध्रगामिनी भवति। तन्मध्ये तटित्कोटिसमानकान्त्या मृणालसूत्रवत् सूक्ष्माङ्गी कुण्डलिनीप्रसिद्धा। तां दृष्ट्वा मनसैव नरः सर्वपापविनाशद्वारा मुक्तो भवति। फालोर्ध्वगललाटविशेषमण्डले निरन्तरं तेजस्तारकयोगविस्फुरणेन पश्यति चेत् सिद्धो भवति। तर्जन्यग्रोन्मीलितकर्णरन्ध्रद्वये तत्र फूत्कारशब्दो जायते। तत्र स्थिते मनसि चक्षुर्मध्यगतनीलज्योतिःस्थलं विलोक्य अन्तर्दृष्ट्या निरतिशयसुखं प्राप्नोति। एवं हृदये पश्यति। एवं अन्तर्लक्ष्यलक्षणं मुमुक्षुभिः उपास्यम्।

[द्वितीयस्य बहिर्लक्ष्यस्य स्वरूप तदभ्यासफलानि च]

अथ बहिर्लक्ष्यलक्षणं—नासिकाग्रे चतुर्भिः षड्भिः अष्टभिः दशभिः द्वादशभिः क्रमादङ्गुलान्ते नीलद्युतिश्यामत्वसदृग्रक्तभङ्गीस्फुरत्पीतवर्णद्वयोपेतव्योम यदि पश्यति स तु योगी भवति। चलदृष्ट्या व्योमभागवीक्षितुः पुरुषस्य दृष्ट्यग्रे ज्योतिर्मयूखा वर्तन्ते। तद्दर्शनेन योगी भवति। तप्तकाञ्चनसंकाशज्योतिमयूखाः अपाङ्गान्ते भूमौ वा पश्यति। तद्दृष्टिः स्थिरा भवति। शीर्षोपरि द्वादशाङ्गुलसमीक्षितुः अमृतत्वं भवति। यत्र कुत्र स्थितस्य शिरसि व्योमज्योतिः दृष्ट चेत स तु योगी भवति।

[तृतीयस्य मध्यमस्य स्वरूपं, तदभ्यासफलानि च]

अथ मध्यमलक्षणम्। प्रातः चित्रादिवर्णाखण्डसूर्यचक्रवत् वह्निज्वालावलीवत् पश्यति। तदाकाराकारितया अवतिष्ठति। तद्भूयोदर्शनेन गुणरहिताकाशं पश्यति। विस्फुरत्तारकाकारसन्दीप्यमानगाढतमोपमं परमाकाशं भवति। सर्वोत्कटपरमद्युतिप्रद्योतमानं तत्त्वाकाशं भवति। कोटिसूर्यप्रकाशवैभवसङ्काशं भवति। एवं बाह्याभ्यन्तरस्थव्योमपञ्चकं तारकलक्ष्यम्। तद्दर्शी विमुक्तफलः तादृग्व्योमसमानो भवति। तस्मात् तारक एव लक्ष्यं अमनस्कफलप्रदं भवति।

[उक्तानां लक्ष्यत्रयव्योम्नां भौतिकत्वशङ्का]

नन्विह अन्तर्लक्ष्यबाह्यलक्ष्यमध्यलक्ष्यलक्षणेषु उच्यमानेषु नीलरक्तपीतचित्रादिवर्णयुक्तव्योमदर्शनानि अवगम्यन्ते। नैतैः दर्शनैः किञ्चिदपि मुमुक्षोः प्रयोजनं भवितुमर्हति। कुतः? नानाविधज्योतिर्विषयकत्वेन भौतिकत्वात्। यदि ब्रह्मज्योतिर्दर्शनं स्यात् तदा क्रममुक्त्यै वा तत् उपयुक्तं स्यात्। न तु तदेतत्। ब्रह्मणः एवं नानाविधत्वाभावात्। भौतिकानि तु ज्योतींषि उपाधिभेदात् बहुविधानि भवितुमर्हन्ति। तस्मात् प्रपञ्चितलक्षणबहुविधज्योतिर्दर्शनानि सिद्ध्यर्थकानि स्युः। उपनिषदां वैयर्थ्यकल्पनानर्हत्वात्। इति चेत्—

[तन्निरसनेन एषां मुमुक्षूपयोगित्वनिर्णयः]

अत्रोच्यते। निर्विशेषस्य परस्य ब्रह्मण एव एतानि ज्योतींषि इति। कुतः? भौतिकज्योतिषां देहाद् बहिः दर्शनीयत्वेन देहान्तर्दर्शनायोग्यत्वात्। प्रत्यगात्मज्योतिषः एकरूपत्वेऽपि विविधनाडीवन्नाडीसम्बन्धवशात् नानावर्णोपपत्तेः। यथा एकवृत्तिमानप्यात्मा नानानाडीसम्बन्धात् जाग्रत्स्वप्नसुषुप्त्यवस्थाविशेषैः नानाविधः अनुभूयते तद्वत्। यद्यपि एतेषां ज्योतिषामखण्डत्वेन दर्शनविषयत्वाभात् क्रममुक्त्यै परम्परया सद्योमुक्त्यै वा साधनत्वं स्यात्। न तु साक्षात्, सद्योमुक्त्यै। न तु तावता सिद्ध्यर्थकानि मुमुक्षोः अनुपयुक्तानीति वक्तुं युक्तम्।

[तारकद्वैविध्यम्]

तत्तारकं द्विविधम्। पूर्वार्धं तारकम् उत्तरार्धममनस्कं चेति। तदेषः श्लोको भवति —

तद्योगं च द्विधा विद्धि पूर्वोत्तरविधानतः।
पूर्वं तु तारकं विद्यात् अमनस्कं तदुत्तरम् ॥ इति।

[तारकयोगस्य सोमसूर्यैक्यदर्शनैकफलकत्वम्]

अक्ष्यन्तस्तारकयोः चन्द्रसूर्यप्रतिफलनं भवति। तारकाभ्यां सूर्यचन्द्रमण्डलदर्शनं ब्रह्माण्ड इव पिण्डाण्डशिरोमध्यस्थाकाशे रवीन्दुमण्डलद्वितयमस्तीति निश्चित्य तारकाभ्यां तद्दर्शनमात्राण्युभयैक्यदृष्ट्या मनोयुक्तं ध्यायेत्। तद्योगाभावे इन्द्रियप्रवृत्तेः अनवकाशात्। तस्मात् तारक एवानुसन्धेयः।

[पूर्वोत्तरार्धयोः तारकामनस्कयोः स्वरूपनिष्कर्षः]

ननु निर्गुणाकाशं परमाकाशं महाकाशं तत्त्वाकाशं सूर्याकाशं चेति तारकलक्ष्यं आकाशपञ्चकमभिधीयते। अत्र कथं पूर्वोत्तरार्धविभागः? इति।

अत्रोच्यते। उभयैक्यदृष्ट्या मनोयुक्तं ध्यायेत् इति तार एवानुसन्धेयः। इति च ध्यानयोगाभ्यासस्य विहितत्वात्।

तदभ्यासकालः पूर्वार्धः तारकयोगसंज्ञकः, तत्फलीभूतज्योतिर्दर्शनकालः उत्तरार्धः अमनस्कयोगसंज्ञकः। एवमेव च आकाशपञ्चकदर्शने पूर्वोत्तरविभागो मन्तव्यः।

[अनुसन्धेयतारकरूपद्वयम्]

तत्तारकं द्विविधम्। मूर्तितारकं अमूर्तितारकं चेति। यत् इन्द्रियान्तं तन्मूर्तिमत्। यद् भ्रूयुगातीतं तदमूर्तिमत्॥

[सगुणनिर्गुणविभागस्यापि उक्तरीतिद्वयमूलकत्वम्]

मूर्तितारकामूर्तितारकयोश्च इन्द्रियान्तभ्रूयुगातीतत्वकथनेन सगुणमूर्तिध्यानपरत्वं चावगन्तव्यम्। सगुणमूर्तिध्यानस्य च निष्कामकृतस्य च क्रममुक्तिचित्तशुद्धिप्रयोजनतया सुप्रसिद्धत्वात्।

[अन्तर्दर्शनेऽपि मनोयोगस्य प्राधान्यम्]

सर्वत्र त्वंपदार्थविवेचने मनोयुक्ताभ्यास इष्यते। तारकाभ्यां तदूर्ध्वस्थसत्वदर्शनात् मनोयुक्तेन अन्तरीक्षणेन सच्चिदानन्दस्वरूपम् ब्रह्मैव। तस्मात् शुक्लतेजोमयं ब्रह्मेति सिद्धम्। तद् ब्रह्म मनःसहकारिचक्षुषा अन्तर्दृष्ट्या वेद्यं भवति। रूपग्रहणप्रयोजनस्य मनश्चक्षुरधीनत्वात्। बाह्यवत् आन्तरेऽपि आत्ममनश्चक्षुस्संयोगेनैव रूपग्रहणकार्योदयात्। तस्मात् मनोयुक्तान्तर्दृष्टिः तारकप्रकाशाय भवति।

[तत्र पूर्वतारकयोगस्वरूपम्]

भ्रूयुगमध्यबिले दृष्टिं तद्द्वारा ऊर्ध्वस्थिततेजः आविर्भूतं तारकयोगो भवति। तेन सह मनोयुक्तं तारकं सुसंयोज्य प्रयत्नेन भ्रूयुग्मं सावधानतया किञ्चिदूर्ध्वमुत्क्षेपयेत्। इति पूर्वभागतारकयोगः॥

[अमनस्कात्मकोत्तरतारकयोगस्वरूपम्]

उत्तरं तु अमूर्तिमत् अमनस्कमिति उच्यते। तालुमूलोर्ध्वभागे महाज्योतिर्मयूखाः वर्तन्ते। तत् योगिभिः ध्येयम्। तस्मात् अणिमादिसिद्धिर्भवति॥

[प्रकृतयोगे पूर्णमनोविलयाभावेन दृश्यमानज्योतिषः
प्रत्यगात्मस्वरूपत्वनिर्णयः]

इदं ज्योतिः त्वंपदार्थः? आहोस्वित् तत्पदार्थः? इति संशीयते। कुतः संशयः? त्वंपदार्थविवेचन इति सच्चिदानन्दस्वरूपं ब्रह्मैवेति च उक्तत्वात्।

अत्रोच्यते। त्वंपदार्थः प्रत्यगात्मैव। ब्रह्मांशत्वात्तु ब्रह्मत्वमुपचर्यते साक्षाद्ब्रह्मयोगो हि मनोवियुक्ताभ्यासरूपः। तत्रैव मनोनाशसम्भवात्। मनोयुक्ताभ्यासस्तु प्रकृतः कण्ठरवोक्तः।

मनस्सहकारिचक्षुषा वेद्यं भवतीति च। यदि मनसैव वेद्यमित्युक्तं तदा अन्तर्दृष्टेः मनोऽनन्यत्वात् मनसः ब्रह्मणि विलयसम्भवाच्च अखण्डब्रह्मयोग एव विवक्षितः इति वक्तुं शक्यम्। न तु तदस्ति। प्रत्यगात्मयोगे च आन्तरे बाह्यवत् आत्ममनश्चक्षुस्संयोगेनैव रूपग्रहणकार्योदयः स्यात्। न तु ब्रह्मयोगे तदीयाखण्डसम्यग्दर्शनं चक्षुरधीनं मनोऽधीनं वा भवति। चक्षुर्मनसी पृष्ठतः कृत्वा स्वयंप्रकाशमानत्वात्।

ननु मनोयुक्तान्तर्दृष्टिरित्युक्तत्वात् मनसः अन्तर्दृष्टिद्वारा ब्रह्मणि विलय एव अर्थादवगम्यते इति चेन्न। बाह्यवदित्युक्तत्वेन प्रकृतयोगे मनोविलयासम्भवात्। तात्कालिकस्तु मनोलयः सुषुप्तस्येव नात्यन्त श्लाघ्यतमो भवितुमर्हति।

यद्वा क्रममुक्तिसाधनीभूतोऽपि स मनोलयः पुनर्जन्मबीजभर्जनाभावात् न नाशापर-पर्यायः इत्यवगन्तव्यम्।

[उक्तयोगस्य पर्यवसाने शाम्भवीमुद्रारूपता]

अन्तर्बाह्यलक्ष्ये दृष्टौ निमेषोन्मेषवर्जितायां शाम्भवी मुद्रा भवति।

[तस्याः महिमा]

तन्मुद्रारूढज्ञानिनिवासात् भूमिः पवित्रा भवति। तद्दृष्ट्या सर्वे लोकाः पवित्रा भवन्ति। तादृशपरमयोगिपूजा यस्य लभ्यते सोऽपि मुक्तो भवति। अन्तर्लक्ष्यज्योतिःस्वरूपं भवति। परमगुरूपदेशेन सहस्रारे ज्वलज्ज्योतिर्वा बुद्धिगुहानिहितज्योतिर्वा षोडशान्तस्थतुरीयचैतन्यं वा अन्तर्लक्ष्यं भवति।

[एतादृशपरमार्थदर्शकगुरुलक्षणम्]

तद्दर्शनं सदाचार्यमूलम्।
आचार्यो वेदसम्पन्नः विष्णुभक्तो विमत्सरः।
योगज्ञो योगनिष्ठश्च सदा योगात्मकः शुचिः।
गुरुभक्तिसमायुक्तः पुरुषज्ञो विशेषतः।
एवंलक्षणसम्पन्नः गुरुरित्यभिधीयते।

[गुरुशब्दार्थः]

गुशब्दस्त्वन्धकारः स्यात् रुशब्दस्तन्निरोधकः।
अन्धकारनिरोधित्वात् गुरुरित्यभिधीयते॥

[गुरोः स्थानम्]

गुरुरेव परं ब्रह्म गुरुरेव परा गतिः ।
गुरुरेव परा विद्या गुरुरेव परायणम् ॥
गुरुरेव परा काष्ठा गुरुरेव परं धनम् ।
यस्मात्तदुपदेष्टासौ तस्मात् गुरुतरो गुरुः ॥

[परमात्मदर्शनाङ्गभूतप्रत्यगात्मदर्शनस्य सर्वथा अनुपेक्षणीयत्वोद्घोषः]

नन्विह तादृशपरमयोगिपूजा यस्य लभ्यते सोऽपि मुक्तो भवतीति एतादृशानि वाक्यानि अर्थवादाः एव स्युः। कुतः? सहस्रारज्वलज्ज्योतिर्वा—इत्यादिवाक्योक्तदेहपरिच्छिन्नज्योतिर्मात्रे पर्यवसन्नायाः अस्याः उपनिषद. आद्यन्तपर्यालोचनेऽपि अपरिच्छिन्नब्रह्मात्मैक्ययोगस्य क्वचिदपि अनुक्तत्वात्। इति चेत्—

अत्रोच्यते। सत्यमेवैतत्। त्वंपदलक्ष्यार्थसिद्धया अहंपदलक्ष्यार्थस्यापि सिद्धत्वेन कैमुतिकन्यायात् ब्रह्मपदार्थसिद्धेः कथं त्वमहंपदार्थयोः भेदः? नायं दोषः। त्वं पदस्य खण्डप्रत्यगात्मार्थकत्वात्। अहंपदस्य तत्त्वमसिवाक्यार्थज्ञानोदयानन्तरं अखण्डब्रह्मयोगाभ्यासार्थं ग्राह्यत्वेन अखण्डप्रत्यगात्मार्थकत्वाच्च त्वमहंपदयोः भेदस्य विस्पष्टत्वात्। तस्मादत्र उक्तयोगिनः सद्योमुक्त्यभावेन औपचरिकपरमत्त्वेन च प्रकृतवाक्यानि अर्थवादा एव। तथापि स्वदेहान्तर्वर्तिज्योतिदर्शनं विना "तत्त्वमसि" इति उपदिशतां अहं ब्रह्मास्मीति वाङ्मात्रेण प्रलपतां च भ्रान्ततमानां कल्पकोटिष्वपि संसारबन्धान्मोक्षासम्भवात् मोक्षप्रथमसाधनत्वाच्चास्य दर्शनस्य उपेक्षा न कदापि कार्या इति स्थितम्।

[उक्तार्थानुसन्धानमहिमा]

यः सकृदुच्चारयति तस्य संसारमोचनं भवति।
सर्वजन्मकृतं पापं तत्क्षणादेव नश्यति।
सर्वान् कामानवाप्नोति।
सर्वपुरुषार्थसिद्धिर्भवति। य एवं वेद। इत्युपनिषत्॥

॥ ॐ पूर्णमदः इति शान्तिः॥

इति श्रीमत्सुन्दरेश्वरताताचार्यशिष्याप्पयशिवाचार्यकृतिषु
अद्वयतारकोपनिषदभाष्यं समाप्तम्॥ ॐ॥

WO 6328—MUPM—1000 copies—25-8-69